एकादशः पाठः

व्याघ्रपथिककथा



(अयं पाठः नारायणपण्डितरचितस्य हितोपदेशनामकस्य नीतिकथाग्रन्थस्य मित्रलाभनामकखण्डात् सङ्कलितः। हितोपदेशे बालकानां मनोरञ्जनाय नीतिशिक्षणाय च नानाकथाः पशुपक्षिसम्बद्धाःश्राविताः। प्रस्तुतकथायां लोभस्य दुष्परिणामः प्रकटितः। पशुपक्षिकथानां मूल्यं मानवानां शिक्षार्थं प्रभूतं भवति इति एतादृशीभिः कथाभिः ज्ञायते।)

कश्चित् वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते- 'भो भोः पान्थाः। इदं सुवर्णकङ्कणं गृह्यताम्।' ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्- भाग्येनैतत्संभवति। किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया। यतः –

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥

'किंतु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव। तन्निरूपयामि तावत्।' प्रकाशं ब्रूते – 'कुत्र तव कङ्कणम् ?' व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्- 'कथं मारात्मके त्वयि विश्वासः ? व्याघ्र उवाच – 'शृणु रे पान्थ ! प्रागेव यौवनदशायामतिदुर्वृत्त आसम्। अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च। वंशहीनश्चाहम्। ततः केनचिद्धार्मिकेणाहमादिष्टः – 'दानधर्मादिकं चरतु भवान्।' तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो कथं न विश्वासभूमिः ? मया च धर्मशास्त्राण्यधीतानि। शृणु –

दरिद्रान्भर कौन्तेय ! मा प्रयच्छेश्वरे धनम्।
व्याधितस्यौषधं पथ्यं, नीरुजस्य किमौषधैः ॥

अन्यच्च –

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।' ततो यावदसौ तद्वचः प्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् – 'अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् –

अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च। अत उच्यते –

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥

ABDIEL SOLUTIONS ABSOL PATNA

शब्दार्थाः

स्नातः	अवगाढ़ः	नहाया हुआ
सरः	सरोवरः	तालाब
तीरम्	पुलिनम्	तट
पान्थाः	पथिकाः	पथिक
सुवर्णकङ्कणम्	स्वर्णरचितं कङ्कणम्	सोने का कंगन

लोभाकृष्टेन	-	लोभाभिभूतेन	-	लालच से आकर्षित के द्वारा
आलोचितम्	-	विचारितम्	-	विचार किया
प्रवृत्तिः	-	कार्यम्	-	कार्य
विधेया	-	कर्त्तव्या	-	करना चाहिए
निरूपयामि	-	निश्चयं करोमि	-	निश्चय करता हूँ
प्रसार्य	-	विस्तार्य	-	फैलाकर
मारात्मके	-	हिंसके	-	हिंसक पर
उवाच	-	अवदत्	-	कहा
दुर्वृत्तः	-	दुराचारी	-	बुरे आचरण वाला
दाराः	-	पत्नी	-	पत्नी
ईश्वरे	-	धनिके	-	धनी में
नीरुजस्य	-	रोगरहितस्य	-	निरोग का
अनुपकारिणे	-	उपकाररहिताय	-	उपकार न करने वाले के लिए
स्नात्वा	-	स्नानं कृत्वा	-	नहाकर
पलायितुम्	-	अपसर्तुम्	-	भागने के लिए
अक्षमः	-	असमर्थः	-	अशक्त
उक्त्वा	-	कथयित्वा	-	कहकर
उपगम्य	-	समीपं गत्वा	-	निकट जाकर

ABDIEL SOLUTIONS ABSOL PATNA

व्याकरणम्

सन्धिविच्छेदः -

कश्चित्	-	कः + चित्
सरस्तीरे	-	सरः + तीरे
पान्थेनालोचितम्	-	पान्थेन + आलोचितम्

भाग्येनैतत्संभवति	–	भाग्येन + एतत् + संभवति
किंत्वस्मिन्नात्मसंदेहे	–	किम् + तु + अस्मिन् + आत्मसंदेहे
प्रवृत्तिर्न	–	प्रवृत्तिः + न
अनिष्टादिष्टलाभेऽपि	–	अनिष्टात् + इष्टलाभे + अपि
गतिर्जायते	–	गतिः + जायते
विषसंसर्गोऽमृतम्	–	विषसंसर्गः + अमृतम्
तदपि	–	तत् + अपि
सर्वत्रार्थार्जने	–	सर्वत्र + अर्थ + अर्जने
तन्निरूपयामि	–	तत् + निरूपयामि
पान्थोऽवदत्	–	पान्थः + अवदत्
प्रागेव	–	प्राक् + एव
वधान्मे	–	वधात् + मे
दाराश्च	–	दाराः + च
वंशहीनश्चाहम्	–	वंशहीनः + च + अहम्
केनचिद्धार्मिकेणाहमादिष्टः	–	केनचित् + धार्मिकेण + अहम् + आदिष्टः
तदुपदेशादिदानीमहम्	–	तत् + उपदेशात् + इदानीम् + अहम्
धर्मशास्त्राण्यधीतानि	–	धर्मशास्त्राणि + अधीतानि
प्रयच्छेश्वरे	–	प्रयच्छ + ईश्वरे
व्याधितस्यौषधम्	–	व्याधितस्य + औषधम्
अन्यच्च	–	अन्यत् + च
दातव्यमिति	–	दातव्यम् + इति
यद्दानम्	–	यत् + दानम्

ABDIEL SOLUTIONS ABSOL ★ PATNA ★

दीयतेऽनुपकारिणे	-	दीयते + अनुपकारिणे
तद्दानम्	-	तत् + दानम्
तदत्र	-	तत् + अत्र
यावदसौ	-	यावत् + असौ
तावन्महापङ्के	-	तावत् + महापङ्के
व्याघ्रोऽवदत्	-	व्याघ्रः + अवदत्
पतितोऽसि	-	पतितः + असि
अतस्त्वाम्	-	अतः + त्वाम्
इत्युक्त्वा	-	इति + उक्त्वा
शनैरुपगम्य	-	शनैः + उपागम्य
पान्थोऽचिन्तयत्	-	पान्थः + अचिन्तयत्
अवशेन्द्रियचित्तानाम्	-	अवश + इन्द्रियचित्तानाम्
चिन्तयन्नेवासौ	-	चिन्तयन् + एव + असौ
खादितश्च	-	खादितः + च

प्रकृतिप्रत्ययविभागः

स्नातः	=	$\sqrt{}$स्ना + क्त
प्रसार्य	=	प्र + $\sqrt{}$सृ + णिच् + ल्यप्
दातव्यम्	=	$\sqrt{}$दा + तव्यत्
स्नात्वा	=	$\sqrt{}$स्ना + क्त्वा
पलायितुम्	=	परा + $\sqrt{}$अय् + तुमुन्
उक्त्वा	=	$\sqrt{}$वच् +क्त्वा

चिन्तयन्	=	√चिन्त् + शतृ
मृतः	=	मृ + क्त
संप्राप्त	=	सम् + प्र + √आप् + क्त
उपगम्य	=	उप + √गम् + ल्यप्
धृतः	=	√धृ +क्त

समासः

सुवर्णकङ्कणम्	-	सुवर्णस्य कङ्कणम् (षष्ठी तत्पुरुषः)
गलितनखदन्तः	-	गलिताः नखादन्ताःयस्य स, (बहुव्रीहिः)
हस्तिस्नानम्	-	हस्तिनः स्नानम्, (षष्ठी तत्पुरुषः)
वंशहीनः	-	वंशेन हीनः, (तृतीया तत्पुरुषः)
कुशहस्तः	-	कुशः हस्ते यस्य सः, (बहुव्रीहिः)
विश्वासभूमिः	-	विश्वासस्य भूमिः, (षष्ठी तत्पुरुषः)

अभ्यासः

(मौखिकः)

1. **अधोलिखितानां प्रश्नानाम् उत्तरं वदत -**

(क) कः स्नातः कुशहस्तः सरस्तीरे ब्रूते ?

(ख) 'भाग्येनैतत्संभवति'- इति केन आलोचितम् ?

(ग) वृद्धव्याघ्रः किं दातुम् इच्छति स्म ?

(घ) पथिकः कुत्र निमग्नः अभवत् ?

(ङ) पथिकः केन व्यापादितः खादितश्च ?

2. **उदाहरणमनुसृत्य उत्तरं वदत–**

उदाहरणमनुसृत्य – स्ना + क्त्वा – स्नात्वा

(क) .... पठित्वा।

(ख) .... खादित्वा।

(ग) .... गत्वा।

(घ) .... दृष्ट्वा।

(ङ) .... हसित्वा।

3. **उदाहरणमनुसृत्य पञ्च पदानि वदत –**

उदाहरणम् – दा + तव्यत् – दातव्यम्

(क) श्रु ....।

(ख) गम् ....।

(ग) स्मृ ....।

(घ) कृ ....।

(ङ) हस् ....।

4. **उदाहरणमनुसृत्य अधोलिखितेषु पदेषु प्रकृतिं प्रत्ययं च वदत – मृ + क्तः – मृतः**

(क) गतः ....।

(ख) उक्तः ....।

(ग) कृतः ....।

(घ) पठितः ....।

(ङ) चलितः ....।

अभ्यासः
(लिखितः)

1. **अधोलिखितानाम् प्रश्नानाम् एकपदेन उत्तरं लिखत -**
   (क) वृद्धव्याघ्रः कुत्र ब्रूते ?
   (ख) कः लोभाकृष्टः अभवत् ?
   (ग) कः सुवर्णकङ्कणं दातुम् इच्छति स्म ?
   (घ) कः स्नानशीलः दाता गलितनखदन्तः च आसीत् ?
   (ङ) कः वंशहीन आसीत् ?
   (च) कः पङ्के अपतत् ?

2. **अधोलिखितानां प्रश्नानां पूर्णवाक्येन उत्तरं लिखत ?**
   (क) 'कुत्र तव कङ्कणम्' इति कः अवदत् ?
   (ख) व्याघ्रः कीदृशः आसीत् ?
   (ग) व्याघ्रेण कानि अधीतानि ?
   (घ) कस्य पुत्रा दाराश्च मृताः ?
   (ङ) कः महापङ्के निमग्नः पलायितुमक्षमः ?

3. **सन्धिविच्छेदं कुरुत -**
   सरस्तीरे, भाग्येनैतत्संभवति, पान्थोऽवदत् वधान्मे, वंशहीनश्चाहम्, धर्मशास्त्राण्यधीतानि, केनचिद्धार्मिकेणाहमादिष्टः, अतस्त्वामहमुत्थापयामि।

4. **अधोलिखितानां पदानां प्रकृति-प्रत्ययविभागं लिखत -**
   स्नात्वा, स्नातुम्, प्रसार्य, उपगम्य, उक्त्वा, धृतः।

5. **अधोलिखितानां क्रियापदानां स्ववाक्येषु प्रयोगं कुरुत -**
   आलोचितम्, गृह्यताम्, दर्शयति, पतति, अचिन्तयत्, अवदत्।

6. **रिक्तस्थानानि पूरयत -**
   (क) भो भोः पान्थाः ! इदं .... गृह्यताम्।
   (ख) व्याघ्रः .... प्रसार्य दर्शयति।
   (ग) तदुपदेशादिदानीमहं कथं न .... ?

(घ) वृद्धव्याघ्रेण संप्राप्तः सः .... मृतः।

(ङ) अहह, ... पतितोऽसि।

7. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधारीकृत्य प्रश्ननिर्माणं कुरुत -

(क) व्याघ्रः हस्तं प्रसार्य दर्शयति।

(ख) पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्।

(ग) व्याघ्रेण धृतः स पान्थोऽचिन्तयत्।

(घ) ईश्वरे धनं मा प्रयच्छ।

(ङ) ज्ञानं क्रियां विना भारः।

8. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं लिखत -

(क) तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।

(ख) असौ व्याघ्रेण व्यापादितः खादितश्च।

(ग) कथं मारात्मके त्वयि विश्वासः।

(घ) तत् उपदेशात् इदानीमहं कथं न विश्वासभूमिः।

(ङ) अवशेन्द्रियचित्तानां क्रिया हस्तिस्नानमिव भवति।

योग्यताविस्तारः

एष पाठः लोभस्य दुष्परिणामं प्रदर्शयति तथा शिक्षयति यत् लोभः पापस्य कारणम् अस्ति। हितोपदेशे पञ्चतन्त्रे च एतादृश्यः अनेकाः कथाः सन्ति, यत्र पशु-पक्षि-मनुष्याणां लोभविषयाः रोचकतया निरूपिताः सन्ति। तासां कथानां श्रवणेन आनन्दानुभूतिस्तु भवत्येव, व्यावहारिकं ज्ञानमपि वर्धते।

क्रियानुशीलनम्

(1) हितोपदेशस्य पञ्चतन्त्रस्य च कथानां संग्रहं कृत्वा तत्र निरूपितस्य लोभस्य दुष्परिणामस्य पृष्ठभूमिः रेखाङ्कनीया।

(2) सिंहस्य चरित्रम् अद्यापि अस्माकं समाजे तथैव विराजते। शोषकाणां वञ्चकानां च चरित्रं सिंहस्य चरित्रेण सह तोलनीयम् अस्ति।

□